त्रिषष्टितम त्रयःषष्टितम तत्संख्यापूरणे त्रि० । स्त्रियां ङीप् । पूरणे डट् । त्रिषष्ट त्रयःषष्ट त्रिषष्टिपूरणे त्रि० । स्त्रियां ङीप् ।

**त्रिषु(सु)पर्ण** पु० त्रयः सुपर्णास्तद्वाचकशब्दा यत्र । १बह्वृचवेदभागभेदे त्रिसौपर्णशब्दे दृश्यं २तद्व्रते च तद्योगात् ३तद्व्रतधारिणि पुरुषे "त्रिणाचिकेतः पञ्चाग्निस्त्रिसु(षु)पर्णः षडङ्गवित्" मनुः । वा कप् । तत्रार्थे "वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः" याज्ञ० ।

**त्रिष्टुभ्** स्त्री त्रिषु स्थानेषु स्तुभ्यते स्तुभ्—क्विप् षत्वम् । एकादशाक्षरपादके वर्णवृत्ते छन्दोभेदे "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च । त्रिष्टुप् च जगती चैव" वृ० र० । प्रस्तारे तस्याः २०४८ भेदाः । "एकादशाक्षरा वै त्रिष्टुप् गायत्री क्षत्रं त्रिष्टुप्" शत०ब्रा०१।३।५।५। "तथैव माध्यन्दिनं सवनमतन्वत" इत्युपक्रमे "एकादशाक्षरा त्रिष्टुभ् तस्मादाहुस्त्रैष्टुभं माध्यन्दिनं सवनमिति" शत०ब्रा० ४।२।२।८ । २तच्छन्दोऽभिमानिदेवतायाञ्च । "इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्" यजु० ९।३० । "इन्द्रो देवः एकादशाक्षरेण छन्दसा त्रिष्टुभं त्रिष्टुप्छन्दोऽभिमानिनीं देवतामुदजयत्" वेददीपः । प्रसङ्गात् छन्दोऽभिमानिदेवताः सर्वानुक्रमणिकायां ४ अ० उक्ताः प्रदर्श्यन्ते । "अथातश्छन्दोदेवता गायत्र्या अग्निरुष्णिहः सविताऽनुष्टुभः सोमो बृहत्या बृहस्पतिः, पङ्क्तेर्वरुणस्त्रिष्टुभ इन्द्रो जगत्याविश्वे देवा विराजो मित्रः, स्वराजो वरुणोऽतिच्छन्दसः प्रजापतिर्विच्छन्दसो वायुर्द्विपदायाः पुरुष एकपदाया ब्रह्मा । सर्वा ऋचः आग्नेय्यः सर्वाणि यजूंषि वायव्यानि सर्वाणि सामानि सौराणि सर्वाणि ब्राह्मणानि च । स्वाहाकारस्याग्निर्वषट्कारस्य विश्वे देवाः । कर्मारम्भे मन्त्राणां देवता वेदितव्याः संन्यस्य मनसि देवतां ततो हविर्हूयते देवतामविज्ञाय यो जुहोति देवास्तस्य हविर्न जुषन्ते । स्वाध्यायमपि योऽधीते मन्त्रदैवतज्ञः सोऽमुष्मिन् लोके देवैरपीज्यते । तस्माच्च देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतः । मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति" । शब्दब्रह्मात्मनः मांसात् तस्या उत्पत्तिः भाग०३।१२।२९ श्लो० उक्ता यथा "तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः । त्रिष्टुम्मांसात् स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः । मज्जातः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्" ।

**त्रिष्टोम** पु० त्रयः स्तोमा यत्र षत्वम् । चत्वष्टुतियज्ञस्य उभयतः कर्त्तव्ये यज्ञभेदे । "चत्वष्टुतिः" कात्या०श्रौ०१५।९।२४ सू० "तमुभयतः एके त्रिष्टोमज्योतिष्टोमौ" २५ सू० । "एके तं चत्वष्टुतिमुभयतः त्रिष्टोमज्योतिष्टोमौ कुर्वन्ति" सं० व्या० ।

**त्रिष्ठ** पु० त्रिषु चक्रेषु तिष्ठति स्था—क अम्बाम्बेत्यादिना षत्वम् । चक्रत्रयस्थिते रथे । "त्रिष्ठं वां सूरे दुहितारुहद्रथम्" ऋ० १।३४।५ । "त्रिष्ठं चक्रत्रयेऽवस्थितं रथम्" भा० ।

**त्रिष्ठिन्** त्रि० त्रिषु विद्यादानयज्ञेषु तिष्ठति स्था—बा० इनि सुषामः० षत्वम् । विद्यादिशीलयुक्ते । "उत्कूलनि कूलेभ्यस्त्रिष्ठिनम्" यजु० ३०।१४० । "त्रिषु विद्यादिषु स्थितं शीलवन्तम्" वेददी० ।

**त्रिस्** अव्य० त्रि+वारे सुच् । त्रिवारे "येन त्रिःसप्तकृत्वो नृपवहुलवसामांसमस्तिष्कपङ्केति" प्रबोधच० । "अनेन विधिना श्राद्धं त्रिरब्दस्य हि निर्वपेत्" मनुः । "त्रिर्जपेदघमर्षणम्" स्मृतिः ।

**त्रिसन्धि** स्त्री त्रयः सन्धयोऽन्तरकाला विकाशेऽस्याः । (फागनिया) १पुष्पभेदे राजनि० । सा त्रिविधा सिताऽसिता रक्ता च । समा०द्वि० । २पूर्वापरमध्यसन्धौ न० ।

**त्रिसन्ध्य** न० समाहारद्वि० । प्राह्णपराह्णमध्याह्नरूपे सन्ध्यात्रये । "सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन !" भा० व० ८२ अ० । "करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः" माघः । "त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः । न तत्र युग्मादरणमन्यत्र हरिवासरात्" ति०त० पराशरः । कुसुमे (फागनिया) राजनि० ।

**त्रिसन्ध्यकुसुमा** स्त्री त्रिसन्ध्यं कुसुमं यस्याः । त्रिसन्धि-

**त्रिसप्तति** स्त्री एकव०त्र्यधिका सप्ततिः शा०त०त्रयश्च सप्ततिश्च इन्द्वस०वा । १त्र्यधिकसप्ततिसंख्यायां २तत्संख्येये च पक्षे वा त्रयआदेशे त्रयःसप्तति तत्रार्थे । तत्र त० पूर्वप्रकृतिस्वरः त्रय आदेशे अन्तोदात्त इति भेदः । ततः पूरणे तमप् । त्रिसप्ततितम त्रयःसप्ततितम तत्पूरणे त्रि०स्त्रियां ङीप् । पूरणे डट् । त्रिसप्तत तत्रार्थे त्रि० स्त्रियां ङीप् । "भीमसेनं त्रिसप्तत्या नकुलं सप्तभिः शरैः" भा०ग०२३अ० । त्रिसप्तत्या युतं शतादि ड । त्रिसप्तत तद्युते शतादौ त्रि० ।

**त्रिसप्तन्** त्रि० ब०व०त्रिगुणिताः सप्त । १एकविंशतिसंख्यायाम् २तत्संख्येये च । "विद्धा चैनं त्रिसप्तभिः भा०ग०१३अ० । "त्रिसप्तकृत्वः पृथिवीं योजिगाय भृगूत्तमः" हरिवं०३०४अ० ।